(1)

उत्तरमध्यमा- द्वितीयखण्ड: (12वीं) 2025-26

विषय कोड 1203

विषय: - व्याकरणम्

समय: 03 घण्टा | आदर्श उत्तराणि | पूर्णाङ्का:

→ सर्वे प्रश्ना: अनिवार्या: ।

→ प्रश्नानां सम्मुखे अङ्का: प्रदत्ता: सन्ति ।

→ प्रश्नानामुत्तराणि संस्कृतभाषायामेव दातव्यम् ।

प्रश्न (1) उचित विकल्पं चित्वा लिखत । 1×6=6

(क) उत्तरम् – (स) अधिकारसूत्रम् ।

(ख) उत्तरम् – (ब) लिट् लकार:

(ग) उत्तरम् – (ब) आर्धधातुके शेष:

(घ) उत्तरम् – (स) हन्

(ङ) उत्तरम् – (अ) गदमदचरयमश्चानुपसर्गे

(च) उत्तरम् – (द) क:

प्रश्न (2) रिक्त स्थानानि पूरयत । 1×6=6

(क) उत्तरम् – व्यक्तायां वाचि

(ख) उत्तरम् – लुङ्

(ग) उत्तरम् – स्वरितेत:

(घ) उत्तरम् – आत्मनेपदं

(ङ) उत्तरम् – क्यच्

(च) उत्तरम् – णिनि

प्रश्न (3) उचितं युग्ममेलनं कुरुत । 1×6=6

(क) उत्तरम् – (अ) वाव्रज्यते

(ख) उत्तरम् – (च) बोभूयते

(ग) उत्तरम् – (छ) क्यप्

(I) (2)

# आदर्श उत्तराणि

(घ) उत्तरम् — (अ) शपोऽपवादः ।

(ङ) उत्तरम् — (द) वलादेः सार्वधातुकस्येट् स्यात् ।

(च) उत्तरम् — (स) जागर्ति

प्रश्न (4) शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत । 1×7 = 7

(क) उत्तरम् — 'न'

(ख) उत्तरम् — 'आम्'

(ग) उत्तरम् — 'आम्'

(घ) उत्तरम् — 'न'

(ङ) उत्तरम् — 'आम्'

(च) उत्तरम् — 'आम्'

(छ) उत्तरम् — 'न' 1×7 = 7

प्रश्न (5) एकपदेन उत्तरं लिखत ।

(क) उत्तरम् — 'क्तक्तवतू निष्ठा'

(ख) उत्तरम् — शतृशानचौ

(ग) उत्तरम् — 'पुगन्तलघूपधस्य च'

(घ) उत्तरम् — कामयते

(ङ) उत्तरम् — 'हनो वध लिङि'

(च) उत्तरम् — 'तनादिकृञ्भ्यः उः'

(छ) उत्तरम् — 'मुण्डयति'

प्रश्न (6) उत्तरम् — 'प्रणिगदति' इत्यत्र नस्य णत्वविधायकं सूत्रम् - 1×2 = 2

"नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च" इति ।

(I) 

# आदर्श उत्तराणि

प्रश्न (7) उत्तरम् - 'शेते' इत्यत्र 'शीङ: सार्वधातुके गुणः' इति सूत्रेण गुणः भवति। 1x2=2

प्रश्न (8) उत्तरम् - 'मुञ्चति' इत्यत्र 'शे मुचादीनाम्' इति सूत्रेण नुमागमः। 1x2=2

प्रश्न (9) उत्तरम् - 'संस्करोति' इत्यत्र 'संपरिभ्यां करोतौ भूषणे' इति सूत्रेण 'सुट्' विधीयते। 1x2=2

प्रश्न (10) उत्तरम् - 'भावयति' इति प्रयोगे 'हेतुमति च' इति सूत्रेण णिच् प्रत्ययः। 1x2=2

प्रश्न (11) उत्तरम् - 'पुत्रकाम्यति' इत्यत्र काम्यच् प्रत्ययः 'काम्यच्च' इति सूत्रेण भवति। 1x2=2

प्रश्न (12) उत्तरम् - 'अभिजानासि कृष्ण यद्वने अभुञ्ज्महि' इत्यत्र 'न यदि' इति सूत्रेण 'अभिज्ञावचने लृट्' इत्यनेन धातोर्लृट् यद्योगे निषेधात् न भवति। 1x2=2

प्रश्न - (13) उत्तरम् - कर्तरि कृत् - कृत्प्रत्ययः कर्तरि स्यादिति। 1x2=2

प्रश्न (14) उत्तरम् - 'ऋ' गतौ इत्यस्माद्धातोः यत्प्रत्यये कृते सति अर्यः इति रूपम् स्वामी वैश्यो वा इत्यर्थः। 1x2=2

प्रश्न (15) उत्तरम् - कारकः, कर्ता च इमे 'ण्वुल्तृचौ' इत्यस्य उदाहरणद्वयं स्तः। अस्ति 1x2=2

प्रश्न (16) उत्तरम् - गुपू रक्षणे लट्लकारः। 1x3=3

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गोपायति | गोपायतः | गोपायन्ति |
| मध्यमपुरुषः | गोपायसि | गोपायथः | गोपायथ |
| उत्तमपुरुषः | गोपायामि | गोपायावः | गोपायामः |

# आदर्श उत्तराणि

अथवा - उत्तरम् - 'भृञ् भरणे' लिट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमपुरुष: | बभार | बभ्रतुः | बभ्रुः |
| मध्यमपुरुष: | बभर्थ | बभ्रथुः | बभ्र |
| उत्तमपुरुष: | बभर, बभार | बभृव | बभृम |

1x3=3

प्रश्न-(17) उत्तरम् - जनी प्रादुर्भावे लट्लकार: -

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमपुरुष: | जायते | जायेते | जायन्ते |
| मध्यमपुरुष: | जायसे | जायेथे | जायध्वे |
| उत्तमपुरुष: | जाये | जायावहे | जायामहे |

अथवा - उत्तरम् - प्रच्छ् ज्ञीप्सायाम् लिट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमपुरुष: | पप्रच्छ | पप्रच्छतुः | पप्रच्छुः |
| मध्यमपुरुष: | पप्रच्छिथ, पप्रष्ठ | पप्रच्छथुः | पप्रच्छ |
| उत्तमपुरुष: | पप्रच्छ | पप्रच्छिव | पप्रच्छिम |

1x3=3

प्रश्न(18) उत्तरम् -

धूनोति चम्पकवनानि धुनोत्यशोकं चूतं धुनाति धुवति स्फुटितातिमुक्तम् ।
धूनोति चम्पकवनानि धुनोत्यशोकं-चूतं धुनाति धुवति स्फुटितातिमुक्तम् । वायुर्विधूनयति चम्पकपुष्परेणून्यत्कानने धवति चन्दनमञ्जरीश्च ॥

इति ।

अथवा उत्तरम् - क्रीणाति - 'डुक्रीञ् द्रव्यविनिमये' इत्यस्माद्धातोर्लटि तत्स्थाने तिपि शपि प्राप्ते तं प्रबाध्य 'क्र्यादिभ्यः श्ना' इत्यनेन श्नाप्रत्ययेऽनुबन्धलोपे क्री + ना + ति इति दशायाम् नकारस्य 'अट्कुप्वाङ्०' इत्यनेन णत्वे क्रीणाति इति रूपं सिद्धम् ।

प्रश्न(19) अथवा - उत्तरम् -

लोहितश्यामदुःखानि हर्षगर्वसुखानि च ।
मूर्छानिद्राकृपाधूमाः करुणा नित्यचर्मणी ॥

- इति कारिका

(1) (5)

# आदर्श उत्तराणि

अथवा - उत्तरम् - शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे - एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् स्यात् । शब्दं करोति शब्दायते ।

प्रश्न (20) उत्तरम् - समासः - 'अज गतिक्षेपणयोः' इति धातोः घञि 1x3=3 'चजोः कु घिण्यतोः' इत्यनेन कुत्वे जाते 'अजिव्रज्योश्च' इत्यनेन निषेधे विभक्तिकार्ये च कृते सति समासः इति रूपं सिद्धं भवति ।

अथवा उत्तरम् वाच्यम् - वच् धातोः 'ऋहलोर्ण्यत्' इत्यनेन ण्यति अनुबंधलोपे वृद्धौ 'वचोऽशब्दसंज्ञायाम्' इत्यनेन कुत्वनिषेधे कृदन्तत्वात् प्रातिपदिकत्वे विभक्तिकार्ये वाच्यम् इति रूपम् सिध्यति ।

प्रश्न (21) उत्तरम् - वोढव्यः - वोढुं शक्यो वोढव्यः' इति विग्रहे वह 1x3=3 प्रापणे धातोस्तव्यप्रत्यये 'हो ढः' इत्यनेन हस्य ढत्वे 'झषस्तथोर्धोऽधः' इति तकारस्य धकारे 'ष्टुना ष्टुः' इति ष्टुत्वे 'ढो ढे लोपः' इति पूर्वढकारस्य लोपे 'सहिवहो:' इत्यवर्णस्यौत्वे विभक्तिकार्ये च वोढव्यः इति रूपं सिद्धम् ।

अथवा उत्तरम् भव्यः - भवतीति भव्यः । भू धातोः 'भव्यगेयप्रवचनीयोपस्थानीय - जन्याप्लाव्यापात्या वा' इति सूत्रेण कर्तरि निपातनात् यत्प्रत्यये गुणेऽवादेशे विभक्तिकार्ये च भव्यः इतिरूपं सिद्धम् ।

प्रश्न (22) उत्तरम् → भवतु - भवतात् - 1x4

भू धातोः 'लोट् च' इत्यनेन लोट् लकारे अनुबन्धलोपे 'लः स्थाने' प्रथमपुरुषैकवचने 'तिपि' भू + ति 'इति स्थिते' 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकत्वे शपि अनुबंधलोपे भू + अ + ति इति स्थिते 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे 'एरुः' इत्यनेन इकारस्य उत्वे भवतु इति प्रयोगः सिध्यति । तुह्योस्तातङाशिष्यन्यतरस्याम्' इत्यनेन तु विभक्तेः स्थाने विकल्पेन तातङादेशे, अनुबन्धलोपे 'भवतात्' इति रूपं सिद्धं भवति ।

अथवा - अधुक्षत् → दुह् धातोर्लुङि तत्स्थाने तिपि पगते अडागमे मध्ये च्लौ 'शल इगुपधादनिटः क्सः' इत्यनेन क्सादेशे अनुबन्धलोपे 'इतश्च' इति तिप इकारलोपे कृते 'दादेर्धातोर्घः' इति सूत्रेण हकारस्य घकारे, -

(I) (6)

# आदर्श उत्तराणि

'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इति सूत्रेण भष्भावेन दकारस्य धकारे 'खरि च' इति चर्त्वेन घस्य ककारे सस्य षत्वे ततः संयोगे अधुक्षत्' इति रूपं सिद्धम् ।

प्रश्न(23) उत्तरम् - म्रियते — 'मृङ् प्राणत्यागे' इत्यस्माद्धातोः 'म्रियतेर्लुङ्लिङोश्च' इत्यनेन आत्मनेपदे त प्रत्यये 'तुदादिभ्यः शः' इति शप्रत्यये अनुबन्धलोपे मृ-अ त' इति भूते गुणे प्राप्ते 'रिङ्शयग्लिङ्क्षु' इत्यनेन ऋकारस्य रिङादेशे अचिश्नुधातु—' इत्यनेन इयङादेशे 'टित आत्मनेपदानां टेरे' इत्यनेन तप्रत्ययाकारस्य एत्वे कृते सति म्रियते इति रूपं साधुतां याति । 1x4=4

अथवा - वेदिता - विद्धातोर्लुटि तत्स्थाने तिपि पगते मध्ये 'स्यतासी लृलुटोः' इत्यनेन तासि प्रत्यये 'लुटः प्रथमस्य डारौरसः' इत्यनेन तिपो डादेशे डित्वाट्टिलोपे लघूपधगुणे व्याघ्रभूत्यादिमतेन सेट्कत्वात् 'आर्धधातुकस्येड्वलादेः' इति 'इडागमेऽनुबन्धलोपे 'वेदिता' इति रूपं सिद्धम् । भाष्यादिमतेऽनिट् कत्वादिडभावे चर्त्वे 'वेत्ता' इत्येव रूपं साधु ।

प्रश्न(24) - उत्तरम् - इन्धे — 'ञिइन्धी-दीप्तौ' इत्यस्माद्धातोर्लटि तत्स्थाने त प्रत्यये 'रुधादिभ्यः श्नम्' इति श्नमि अनुबन्धलोपे 'टित आत्मनेपदानां टेरे' इति टेरेत्वे 'श्नान्नलोपः' इति नलोपे 'श्नसोरल्लोपः' इति अलोपे 'झषस्तथोर्धोऽधः' इति तकारस्य धकारे 'झरो झरि सवर्णे' इति वैकल्पिकधकारलोपे 'इन्धे' इति रूपं सिद्धम् । लोपाभावे तु धस्य जत्वे इन्द्धे इति रूपं सिद्धं भवति । 1x4=4

अथवा - करोति — 'डुकृञ्-करणे' इत्यस्माद्धातोर्लट्लकारे तत्स्थाने तिपि पगते कृ-उ-ति इति जाते शपं प्रबाध्य 'तनादिकृञ्भ्यः उः' इत्यनेन उप्रत्यये 'सार्वधातुकार्धधातुकयोः' इति उप्रत्ययस्य आर्धधातुकत्वात् ऋकारस्य गुणे रपरत्वे उकारस्य गुणे च कृते सति करोति इति रूपं सिद्धम् ।

(I) (7)

# आदर्श-उत्तराणि

प्रश्न (25) उत्तरम् - स्थापयति - 1x4=4

'स्था गतिनिवृत्तौ' इत्यस्माद्धातोः 'हेतुमति च' इत्यनेन णिचि अनुबन्धलोपे टुत्वनिवृत्तौ 'स्था इ' इति स्थिते 'अर्तिह्रीव्ली०' इत्यादिना पुगागमेऽनुबन्धलोपे 'स्थापि' इति जाते तस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां लटि तिपि सार्वधातुकत्वे शपि अनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे अयादेशे च कृते सति स्थापयति इति रूपं सिद्ध्यति।

अथवा - नरीनृत्यते - पुनः पुनः अतिशयेन भृशं वा नृत्यति इत्यस्मिन् विग्रहे 'नृती गात्रविक्षेपे' इति धातोः यङि ('सन्यङोः') इति द्वित्वेऽभ्यासत्वे उरदत्वे हलादिशेषे 'रीगृदुपधस्य च' इति रीगागमेऽनुबन्धलोपे यङन्तत्वात् धातुसंज्ञायां लटि तप्रत्यये टेरेत्वे शपि 'अतो गुणे' इति पररूपे कृते सति नरीनृत्यते इति प्रयोगसिद्धिः।

प्रश्न (26) उत्तरम् - शत्रुघ्नः - शत्रुं हन्तीति विग्रहे शत्रूपपदात् 'हन् हिंसागत्योः' इति धातोः 'मूलविभुजादिभ्यः कः' इति वार्तिकेन क प्रत्यये 'गमहन०' इत्यादिना उपधालोपे 'हो हन्तेर्ञ्णिन्नेषु' इति कुत्वेन घकारे कृते उपपदसमासे सुपो लुकि शत्रुघ्न इत्यस्य प्रातिपदिकत्वे सौ रुत्वे विसर्गे च कृते सति शत्रुघ्नः इति रूपसिद्धिः। 1x4=4

अथवा - जल्पाकः - जल्पितुं शीलः जल्पाकः। जल्पधातोः 'जल्पभिक्षकुट्ट-लुण्टवृङः षाकन्' इत्यनेन षाकन् प्रत्यये 'ष प्रत्ययस्येति' षस्येत्संज्ञायां लोपे च सवर्णदीर्घे स्वादिकार्ये च कृते सति जल्पाकः इति रूपं सिद्धं भवति।

प्रश्न (27) उत्तरम् -> 1x5=5

(1) मृज् + क्यप् = मृज्यः
(2) लूञ् + ण्यत् = लाव्यम्
(3) एध + तव्यत् = एधितव्यम्
(4) जी + यत् = जेयम्
(5) ~~स्तु~~ इण् + क्यप् = इत्यः

## आदर्श-उत्तराणि

अथवा- उत्तरम् -

'पाय्यसांनाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु'। पीयतेऽनेन पाय्यं मानम् । ण्यत्प्रत्ययादेः पत्वं च। 'आतो युक्' इति युक् । सम्यङ् नीयते होमार्थमग्निं प्रतीति सांनाय्यं हविर्विशेषः। ण्यदायादेशः समोर्दीर्घश्च निपात्यते। निचीयतेऽस्मिन् धान्यादिकं निकाय्यो निवासः। अधिकरणे ण्यत् आयादेशादेः कुत्वं च निपात्यते। धीयतेऽनया समिदिति धाय्या ऋक् ।

प्रश्न(28) उत्तरम् - (1) गोविन्दः - गाः विन्दतीत्यर्थे गो अस् उपपद विदलृ लाभे धातोः 'गवादिषु विन्देः संज्ञायाम्' इति वार्तिकेन संज्ञागम्यमाने शप्रत्यये शित्वात् सार्वधातुकत्वे 'तुदादिभ्यः शः' इति शविकरणे 'शे मुचादीनाम्' इति नुमि विभक्तिकार्ये च गोविन्दः इति रूपं सिद्धम् । 1x5=5

(2) पतिघ्नी - 'पतिं हन्तीति' विग्रहे पतिमुपपदे 'लक्षणे जायापत्योष्टक्' इति टकि उपपदसमासे सुब्लुकि 'गमहनजन॰' इत्युपधालोपे 'हो हन्तेर्ञ्णिन्नेषु' इत्यनेन कुत्वे विभक्तिकार्ये च कृते सति पतिघ्नी इति रूपं सिद्धम्।

अथवा

(1) क्षीणवान् - क्षिधातोः भूतार्थवृत्तौ 'निष्ठा' इति सूत्रेण कर्तरि क्तवतु प्रत्यये अनुबन्धलोपे कित्वात् गुणाभावे 'निष्ठायामण्यदर्थे' इति दीर्घे 'क्षियो दीर्घात्' इति तकारस्य नकारे णत्वे कृदन्तत्वात् सौ उगित्वान्नुमि दीर्घे सुलोपे संयोगान्ततकारलोपे च कृते सति क्षीणवान् इति रूपं सिद्ध्यति।

(2) शीर्णः - शॄधातोः कर्मणि निष्ठा इत्यनेन क्तप्रत्यये 'ॠत इद्धातोः' इत्यनेन इत्वे रपरत्वे 'हलि च' इति दीर्घे 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इति निष्ठातकारस्य नत्वे तस्य णत्वे विभक्तिकार्ये च कृते सति शीर्णः इति प्रयोगं सिद्धं भवति।

॥ इति ॥